श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ एकोनविंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकोनविंशः सर्गः ॥

## रावणेनानरण्यस्य वधस्ततस्तस्य शापप्राप्तिश्च

अथ जित्वा मरुत्तं स प्रययौ राक्षसाधिपः।
नगराणि नरेन्द्राणां युद्धकाङ्क्षी दशाननः॥ **7.19.1** ॥

समासाद्य तु राजेन्द्रान् महेन्द्रवरुणोपमान्।
अब्रवीद् राक्षसेन्द्रस्तु युद्धं मे दीयतामिति॥ **7.19.2** ॥

निर्जिताः स्मेति वा ब्रूत एष मे हि सुनिश्चयः।
अन्यथा कुर्वतामेवं मोक्षो नैवोपपद्यते॥ **7.19.3** ॥

ततस्त्वभीरवः प्राज्ञाः पार्थिवा धर्मनिश्चयाः।
मन्त्रयित्वा ततोऽन्योन्यं राजानः सुमहाबलाः॥ **7.19.4** ॥

निर्जिताः स्मेत्यभाषन्त ज्ञात्वा वरबलं रिपोः।
दुष्यन्तः सुरथो गाधिर्गयो राजा पुरूरवाः॥ **7.19.5** ॥

एते सर्वेऽब्रुवंस्तात निर्जिताः स्मेति पार्थिवाः।
अथायोध्यां समासाद्य रावणो राक्षसाधिपः॥ **7.19.6** ॥

सुगुप्तामनरण्येन शक्रेणेवामरावतीम्।
स तं पुरुषशार्दूलं पुरन्दरसमं बले॥ **7.19.7** ॥

प्राह राजानमासाद्य युद्धं देहीति रावणः।
निर्जितोऽस्मीति वा ब्रूहि त्वमेवं मम शासनम्॥ **7.19.8** ॥

अयोध्याधिपतिस्तस्य श्रुत्वा पापात्मनो वचः।
अनरण्यस्तु सङ्क्रुद्धो राक्षसेन्द्रमथाब्रवीत्॥ **7.19.9** ॥

दीयते द्वन्द्वयुद्धं ते राक्षसाधिपते मया।
सन्तिष्ठ क्षिप्रमायत्तो भव चैवं भवाम्यहम्॥ **7.19.10** ॥

अथ पूर्वं श्रुतार्थेन निर्जितं सुमहद् बलम्।
निष्क्रामत् तन्नरेन्द्रस्य बलं रक्षोवधोद्यतम्॥ **7.19.11** ॥

नागानां दशसाहस्रं वाजिनां नियुतं तथा।
रथानां बहुसाहस्रं पत्तीनां च नरोत्तम॥ **7.19.12** ॥

महीं सञ्छाद्य निष्क्रान्तं सपदातिरथं रणे।
ततः प्रवृत्तं सुमहद् युद्धं युद्धविशारद॥ **7.19.13** ॥

अनरण्यस्य नृपते राक्षसेन्द्रस्य चाद्भुतम्।
तद् रावणबलं प्राप्य बलं तस्य महीपतेः॥ **7.19.14** ॥

प्राणश्यत तदा सर्वं हव्यं हुतमिवानले।
युद्ध्वा च सुचिरं कालं कृत्वा विक्रममुत्तमम्॥ **7.19.15** ॥

प्रज्वलन्तं तमासाद्य क्षिप्रमेवावशेषितम्।
प्राविशत् सङ्कुलं तत्र शलभा इव पावकम्॥ **7.19.16** ॥

सोऽपश्यत् तन्नरेन्द्रस्तु नश्यमानं महाबलम्।
महार्णवं समासाद्य वनापगशतं यथा॥ **7.19.17** ॥

ततः शक्रधनुःप्रख्यं धनुर्विस्फारयन् स्वयम्।
आससाद नरेन्द्रस्तं रावणं क्रोधमूर्छितः॥ **7.19.18** ॥

अनरण्येन तेऽमात्या मारीचशुकसारणाः।
प्रहस्तसहिता भग्ना व्यद्रवन्त मृगा इव॥ **7.19.19** ॥

ततो बाणशतान्यष्टौ पातयामास मूर्धनि।
तस्य राक्षसराजस्य इक्ष्वाकुकुलनन्दनः॥ **7.19.20** ॥

तस्य बाणाः पतन्तस्ते चक्रिरे न क्षतं क्वचित्।
वारिधारा इवाभ्रेभ्यः पतन्त्यो गिरिमूर्धनि॥ **7.19.21** ॥

ततो राक्षसराजेन क्रुद्धेन नृपतिस्तदा।
तलेनाभिहतो मूर्ध्नि स रथान्निपपात ह॥ **7.19.22** ॥

स राजा पतितो भूमौ विह्वलः प्रविवेपितः।
वज्रदग्ध इवारण्ये सालो निपतितो यथा॥ **7.19.23** ॥

तं प्रहस्याब्रवीद् रक्ष इक्ष्वाकुं पृथिवीपतिम्।
किमिदानीं फलं प्राप्तं त्वया मां प्रति युध्यता॥ **7.19.24** ॥

त्रैलोक्ये नास्ति यो द्वन्द्वं मम दद्यान्नराधिप।
शङ्के प्रसक्तो भोगेषु न शृणोषि बलं मम॥ **7.19.25** ॥

तस्यैवं ब्रुवतो राजा मन्दासुर्वाक्यमब्रवीत्।
किं शक्यमिह कर्तुं वै कालो हि दुरतिक्रमः॥ **7.19.26** ॥

नह्यहं निर्जितो रक्षस्त्वया चात्मप्रशंसिना।
कालेनैव विपन्नोऽहं हेतुभूतस्तु मे भवान्॥ **7.19.27** ॥

किं त्विदानीं मया शक्यं कर्तुं प्राणपरिक्षये।
न ह्यहं विमुखो रक्षो युद्ध्यमानस्त्वया हतः॥ **7.19.28** ॥

इक्ष्वाकुपरिभावित्वाद् वचो वक्ष्यामि राक्षस।
यदि दत्तं यदि हुतं यदि मे सुकृतं तपः।
यदि गुप्ताः प्रजाः सम्यक् तदा सत्यं वचोऽस्तु मे॥ **7.19.29**॥

उत्पत्स्यते कुले ह्यस्मिन्निक्ष्वाकूणां महात्मनाम्।
रामो दाशरथिर्नाम स ते प्राणान् हरिष्यति॥ **7.19.30**॥

ततो जलधरोदग्रस्ताडितो देवदुन्दुभिः।
तस्मिन्नुदाहृते शापे पुष्पवृष्टिश्च खाच्च्युता॥ **7.19.31**॥

ततः स राजा राजेन्द्र गतः स्थानं त्रिविष्टपम्।
स्वर्गते च नृपे तस्मिन् राक्षसः सोऽपसर्पत॥ **7.19.32**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकोनविंशः सर्गः॥